This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M119 विषय स्तोत्र
नाव. गणपती अथर्वशीर्ष (Mss.)
लेखक/लिपीकार —
पृष्ठ 3 काळ पूर्ण/अपूर्ण

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पो.

श्रीगणेशायनमः॥ ॐ नमस्तेगणपतये॥ त्वमेवप्रत्यक्षंतत्वमसि त्वमेवकेवलंकर्तासी त्वमेवकेवलंधर्तासी त्वमेवकेवलंहर्तासी त्वमेवसर्वंखल्विदंब्रह्मासी त्वंसाक्षादात्मासीनित्यं ऋतंवच्मि सत्यंवच्मि अवत्वंमां अववक्तारं अवश्रोतारं अवदातारं अवधातारं अवानूचानमवशिष्यं अवपश्चात्तात् अवपुरस्तात् अवोत्तरात्तात् अवदक्षिणात्तात् अवचोर्ध्वात्तात् अवाधरात्तात् सर्वतोमांपाहिपाहिसंमंतात् त्वंवाङ्मयस्त्वंचिन्मयः त्वमानंदमयस्त्वंब्रह्ममयः त्वंसच्चिदानंदाद्वितीयोसि त्वंप्रत्यक्षंब्रह्मासी त्वंज्ञानमयोविज्ञानमयोसि सर्वंजगदिदंत्वत्तोजायते सर्वंजगदिदंत्वत्तस्तिष्ठति सर्वंजग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग॰ दिदंत्रैलयमेष्यति सर्वंजगदिदंत्वयिप्रत्येति त्वंभूमिरापो अ॰
१ नलोनिलोनभः त्वंचत्वारीवाक्पदानी त्वंगुणत्रयातीतः
त्वंदेहत्रयातीतः त्वंकालत्रयातीतः त्वंमूलाधारस्तितोसि
नित्यं त्वंशक्तित्रयात्मकः त्वांयोगिनोध्यायंतिनित्यं त्वंब्र
ह्मात्वंविष्णुस्त्वंरुद्रस्त्वमिंद्रस्त्वमग्निस्त्वंवायुस्त्वंसूर्यस्त्वंचंद्र
मास्त्वंब्रह्मभूर्भुवःस्वरों गणादींपूर्वमुच्चार्यवर्णादींतदनंत
रं अनुस्वारःपरतरः अर्धेंदुलसितं तारेणरुध्धं एतत्तव
मनुस्वरूपं गकारःपूर्वरूपं अकारोमध्यमरूपं अनुस्वा
रःश्चांत्यरूपं बिंदुरुत्तररूपं नादःसंधानं संहितासंधिः
सैषागणेशविद्या गणकऋषिः निचृद्गायत्रीछंदः गणप

तिर्देवता ॐगंगणपतयेनमः एकदंताय विद्महे वक्रतुंडाय
धीमहीतन्नोदंतिःप्रचोदयात् एकदंतंचतुर्हस्तंपाशमंकुश
धारिणं रदंचवरदंहस्तैर्बिभ्राणंमूषकध्वजं रक्तंलंबोदरंशू
र्पकर्णकंरक्तवाससं रक्तगंधानुलिप्तांगंरक्तपुष्पैस्सुपूजितं
भक्तानुकंपिनंदेवंजगत्कारणमच्युतं आविर्भूतंचसृष्ट्या
दौःप्रकृतयेपुरुषात्परं एवंध्यायंतियोंनित्यंसयोगीयोगिनां
वरः नमोव्रातपतयेनमोगणपतयेनमःप्रमथपतयेनम
स्तेस्तुलंबोदरायैकदंतायविघ्ननाशिनेशिवसुतायवरदमूर्त
येनमः १ एतदथर्वशिर्षंयोधीते॥सब्रह्मभूयायकल्पते॥स
सर्वविघ्नैर्नबाध्यते॥सपंचमहापापात्प्रमुच्यते॥सायमधीया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग॰ नोदिवसकृतंपापंनाशयती ॥ प्रातरधीयानोरात्रीकृतंपापंनाश अ॰
२ यति ॥ सायंप्रातः प्रभुंजानोअपापोभवति ॥ सर्वत्राधीयानो
पविघ्नोभवति ॥ धर्मार्थकाममोक्षंचविंदती ॥ योयद्दिमोहाद्दा
स्यती ॥ सपापीयान्भवति ॥ सहस्त्रावर्तनात् ॥ यंयंकामम
धीते ॥ तंतमनेनसाधयेत् ॥ अनेनगणपतिमभिषिंचति ॥
सवाग्मीभवति ॥ चतुर्थ्यामनश्नंजपति ॥ सविद्यावान्भवति ॥
इत्यथर्वणवाक्यं ॥ ब्रह्माद्याचरणंविद्यात् ॥ नबिभेतिकदाच
नेति ॥ योदुर्वांकुरैर्यजति ॥ सवैश्रवणोपमोभवति ॥ योलाजै
र्जयति ॥ सयशोवान्भवति ॥ समेधावान्भवति ॥ योमोदकस
हस्त्रेणयजति ॥ सवांछितफलमवाप्नोति ॥ यःसाज्यःसमि

द्भिर्यजति ॥ ससर्वंलभतेससर्वंलभते ॥ अष्टौब्राह्मणांसम्यग्ग्रा
हयित्वा ॥ सूर्यवर्चस्वीभवती ॥ सूर्यग्रहेमहानद्यांप्रतिमासंनि
धौवाजप्त्वा ॥ सिद्धमंत्रोभवति ॥ महाविघ्नात्प्रमुच्यते ॥ महापा
पात्प्रमुच्यते ॥ महादोषात्प्रमुच्यते ॥ ससर्वविद्भवतिससर्ववि
द्भवतिय एवंवेद ॥ इत्युपनिषत् ॥ सहनाववतु ॥ सहनौभुनक्तु
सहवीर्यंकरवावहै ॥ तेजस्विनावधीतमस्तुमाविद्दिषावहै
॥ ॐशांतिः शांतिः शांतिः ॥ ॥ इतिगणपतिअथर्वशीर्ष
समाप्तः ॥ श्रीगजाननार्पणमस्तु छ छ छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग॰
३

ओ॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=09.08.19 11:31
,TRANSFERRED=2019/08/09 at 11:33:52
,PAGES=5
,TYPE=STD
,NAME=S0001413
,Book Name=M-119-GANPATI ARTHVASHISH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection